**दिनाङ्क :- 11.07.2024**
**प्रातः - 06: 55**

**प्रधानमन्त्री/प्रस्थानम्**

प्रधानमन्त्री नरेन्द्र-मोदी देशद्वयस्य यात्रां विधाय दिल्लीं प्रति प्रस्थितः। विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः अवदत् यत् दशक-चतुष्टयस्य अनन्तरम् एषा उच्चस्तरीय-यात्रा भारत-ऑस्ट्रिया-संबन्धान् व्यापकतया सुदृढीकरिष्यति।

**प्रधानमन्त्री/आस्ट्रिया**

गतदिने प्रधानमन्त्री वियनानगरे आस्ट्रियाराष्ट्राध्यक्षेण कार्लनेहैमरेण सह द्विपक्षीयसम्बन्धानां विविधपरिमाणानां विषये चर्चां कृतवान्। एतेषु व्यापारः निवेशः, विज्ञानं, प्राविधिकी, हरितोर्जा, कृत्रिमबुद्धिमत्ता, नवोद्योगाः पर्यावरणं, जलवायुपरिवर्तनं, सांस्कृतिकसहकार्यं जनसम्बन्धाश्चेति विषयाः प्रमुखाः आसन्। परस्परहितस्य क्षेत्रीयवैश्विकविषयेषु अपि नेतारौ विचाराणां कृतवन्तौ। सभायाः अनन्तरं वार्ताहरवक्तव्ये श्रीमोदी अवदत् यत् तयोः चर्चा मानवता–जलवायुपरिवर्तनातङ्कवाद-विषयेषु अपि अभवत्।

प्रधानमन्त्रिणा उक्तं यत् लोकतन्त्रं, विधिराज्यम् इत्यादिषु मूल्येषु विश्वासः भारत-ऑस्ट्रिया-सम्बन्धस्य दृढमूलाधाराः सन्ति। सः अवदत् यत् परस्परविश्वासेन सहहितैः च सम्बन्धाः सुदृढाः भवन्ति। प्रधानमन्त्री अवदत् यत् सः ह्यः राष्ट्राध्यक्षेण नेहमेरेण सह अतीव महत्त्वपूर्णं सफलं च वार्तालापं कृतवान्। परस्परसहकार्यं अधिकं सुदृढं कर्तुं नूतनाः सम्भावनाः च ताभ्यां अंकिताः।
प्रधानमन्त्री अवदत् यत् तौ विश्वे प्रचलितानां सर्वेषां संघर्षाणां विषये अपि विस्तरेण चर्चां कृतवन्तौ, यत्र यूक्रेन-पश्चिमैशिया-देशयोः स्थितिः अपि अन्यतमा आसीत्। प्रधानमन्त्री अवदत् यत् एषः युद्धस्य समयः नास्ति इति ।

चर्चाविधौ उभौ नेतारौ संयुक्तराष्ट्रसङ्घस्य अन्येषु च अन्ताराष्ट्रियसङ्घटनेषु परिष्कारस्य आवश्यकतायाः विषये अपि बलं दत्तवन्तौ।

श्री-नेहमरः अवदत् यत् आधारभूतसंरचनायाः, समाजे प्राविधिकीकरणस्य, आधारभूतसंरचनानां विकाससन्दर्भे च भारतस्य सफलता प्रभावशालिनी वर्तते।
ततः पूर्वं वियनानगरे प्रधानमन्त्रिणः मोदिनः समारोहपूर्वकं स्वागतं अभवत्। सः द्विराष्ट्रयात्रायाः द्वितीयचरणे परह्यः मास्कोतः वियनानगरं प्राप्तवान्।

**उत्तरप्रदेशसर्वकारः**

बद्रीनाथयात्रा द्वितीयदिनेऽपि उत्तराखण्डे चमौली-जनपदे भूस्खलनकारणात् प्रबाधिता जाता। तत्रान्तरे, उत्तरप्रदेशसर्वकारः तेषां कृषकाणां कृते भूमिपट्टानि प्रदास्यति येषां कृषिभूमिः जलप्लवकारणात् नष्टा जाता। मुख्यमन्त्री योगी आदित्यनाथः प्लवग्रस्तजनपदेषु पीलीभीत-लखीमपुर-खिरी-जनपदेषु विमान-सर्वेक्षणं कृत्वा गतवासरे उद्धार-कार्यक्रमस्य समीक्षां कृतवान् ।

**केन्द्रीयस्वास्थ्यमन्त्री/समीक्षा**

केन्द्रीयस्वास्थ्यमन्त्री जगतप्रकाशनड्डा स्वमन्त्रालयस्य वरिष्ठाधिकारिभिः सह ह्यः एकं समीक्षोपवेशनम् आकारितवान्। उपवेशने अस्मिन् राष्ट्रे डेंगू इत्यस्य परीक्षणतत्परतायाः आकलनं कृतम्। बुधवासरे नवदिल्लीनगरे वार्ताहरसम्मेलनं सम्बोधयन् नड्डामहोदयः अवदत् यत् मन्त्रालयः डेंगूनिवारणस्य, निरोधस्य, प्रबन्धनस्य च योजनाः सज्जीकरोति राज्यैः सह मिलित्वा च कार्यं कुर्वन् अस्ति। सः सूचितवान् यत् मन्त्रालयः शीघ्रमेव अहर्निशडेंगू-सहायतारेखां प्रारभते तथा च राज्येभ्यः आगामिषु ४-५-दिवसेषु स्वस्य अपि सहायतारेखां प्रारम्भं कर्तुं कथितमस्ति ।

**मुस्लिममहिलाधिकारः/सर्वोच्चन्यायालयः**

सर्वोच्चन्यायालयेन ह्यः उक्तं यत् आपराधिकप्रक्रियासंहितायां पञ्चविंशत्युत्तरैकशततम्याः धारायाः अन्तर्गतं मुस्लिममहिला स्वपतेः भरणपोषणस्य कृते धनप्राप्तेः अधिकारिणी अस्ति। न्यायाधीशस्य बी.वी.नगरथना इत्यस्य अगस्टिन् जार्ज मसिहस्य च संयुक्तपीठिका अस्मिन् प्रकरणे याचिकां निरस्तां कृतवती, यस्याम् एकः पुरुषः स्वस्य तलाकप्राप्तपत्न्याः भरणपोषणधनं दातुं निर्देशस्य विरुद्धं याचिकां कृतवान्।

**।। इति वार्ताः ।।**